# चार्वाकचिन्तनसरण्यां चैतन्यस्यस्थानम्

बि.जि. श्रीलक्ष्मीः

दृष्टिर्हि दर्शनम्, साक्षादनुभूतिः न व्यवहितज्ञानम् । प्रमाणैर्निणी -
तं यथार्थ तत्त्वंवादर्शनम् (अनेन दृश्यते इति वा) शास्त्रम् ।
दृष्टयः मतानि, इत्यपि न्यायसूत्र व्याख्याने(४.१.१४) ।

भारतीयदर्शने तावत् द्वौ अंशौ विद्येते, चैतन्यांशः, तर्कांशश्च ।

एतदंशद्वययुक्तस्य दर्शनस्योगमः भारते वेदेषु एव मृग्यः । भेदप्रभेदतया दर्शनानि बहून्यपि षड़ेव प्रसिद्धानि । तेषाममूनि नामानि -

बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि दर्शनानाममून्यहो ।
नैयायिकमतदन्ये भेदं वैशेषिकैः सह
न मन्यन्ते मते तेषां पञ्चैवास्तिक वादिनः ॥
षड् दर्शन संख्या तु पूर्यते तन्मते किल ।
लोकायतमतक्षेपात्कथ्यन्ते तेन तन्मतम् ॥

तेषु द्वौ प्रमुखौ विभागौ स्तः । वैदिकानि दर्शनानि अवैदिकानि च । अवैदिकानि दर्शनानि नास्तिक दर्शनपदेन व्यवह्रियन्ते, वैदिकानि च आस्तिकपदेन । परलोकः अस्तीति यस्य मतिः अस्ति स आस्तिक., तद्विपरीतो नास्तिकः, प्रमाणानुपातिनी यस्य मतिः सदैष्टिक (प्रामाणिकः) इति काशिकायां नास्ति दिष्टंमतिः (४.४.६०) इति पाणिनिसूत्रं विवृतम्। न केवलं आमष्मिकलोके नास्तिक्यभावना अपि तु वेदप्रामाण्ये विमतिः नास्तिक्यमिति मन्यते[1] । तत्र अवैदिकदर्शनानि - चार्वाक दर्शनं, बौद्ध (सौगत) दर्शनं, जैन (आर्हत) दर्शनञ्च। गौतमकाणाद - कापिल पातञ्जल

जैमिनीय - वैयासिकदर्शनानि आस्तिकानि।

चारुः वाक् इति चार्वाकशब्दस्यनिरुक्तिः । आपातमनोरम लोकचित्ताकर्षकः वाकः वाक्यमस्य (पृषोदरादित्वाद्) । चर्चअदने, चर्वन्ति अदन्ति (भक्षयन्ति) तत्वतो न मन्यन्ते पुण्यपापादिकं परोक्षं वस्तुजातमिति चार्वाकाः इत्यपि निर्वचनम् । तेषां मतं चार्वाकम्। बार्हस्पत्यमित्यपरं नाम बृहस्पति प्रणीतत्वात् । आचार्योऽयं अर्थशास्त्रप्रणेतुर्बृहस्पतेर्भिन्नः । लोके आयतं बाहुल्येन प्रचरितत्वातं लोकानां आयतनं वा लोकायतमित्यपि व्यवह्रियते । निर्विचाराः सामान्या लोकास्तावदाचरन्तिस्मेति लोकायता लोकायतिका इत्यपि (धूर्तचार्वाकाः सुशिक्षितचार्वाका इति सविशेषमपि व्यवहरन्ति दर्शनकाराः)

विज्ञानधन एतेभ्यः भूतेभ्यो समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञास्तीत्यरे ब्रवीमि इति होवाच याज्ञवल्क्यः ॥ बृ.उप. २.४.१२..... इत्यादयः वेदेषु पुराणेषु रामायणमहा भारतादिकृतिषु विद्यमानाः विचाराः चार्वाकमतस्य मूलमिति भासते। यद्यपि चार्वाक दर्शनमायतं लोके अस्य ग्रन्थाः अधुना नोपलभ्यन्ते । 'वर्णिका भागुरी लोकायतस्य (७-३-४५) इति महाभाष्ये पतञ्जलिनोक्तेनानेन ज्ञायते यत् पतञ्जलिसमये अस्य मतस्य ग्रन्थाःप्राप्यन्ते स्म। किंतु गच्छता कालेन ऽऽस्तिकदर्शनकारैरिदं बहुधा निराकृतम् । अनेनकारणेन संप्रति दर्शनान्तरग्रन्थेषु पूर्वपक्षरुपेण एव अस्योल्लेखः दरीदृश्यते । वेदान्तसूत्रभाष्ये गीताटीकासु च अथ लोकायतम्, 'पृथिव्यप्तेजोवायुरिति तत्त्वानि', तत्समुदाये शरीरेन्द्रिय विषयसंज्ञा, 'तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवद्विज्ञानम्', चैतन्यविशिष्टः कायः पुरुषः, 'काम एवैकः पुरुषार्थः', 'मरणमेवापवर्गः' इत्येतानि बार्हस्पत्यसूत्राणि उद्धृतानि । अत एव जयन्तभट्टेन न्यायमञ्जर्यामुक्तम् - 'तदेवं पूर्वपक्षवचनमूलत्वात् लोकायतशास्त्र' मपि न स्वतन्त्रम् आह्निकम् किंच 'नहि लोकयते किंचित् कर्तव्यमुपदिश्यते । वैतण्डिककथैवासौ न पुनः कश्चिदागमः आह्निकम्[४] बौद्धादिग्रन्थेषु च लोकायतिकानां नास्ति दीक्षादिकं वितण्डवादसत्यम् (शास्त्रम्) इत्यपि प्रत्याख्यातम् ।

तथापि माधवीय सर्वदर्शनसंग्रहे तथा हरिभद्रसूरिकृतषड्दर्शनसमुच्चये दर्शनत्वेनाङ्गीकृतस्यास्य प्रमुखानि तत्त्वानि तानि संगृहीतानि । अस्य वादसरणी अन्याऽनपकरणीया विजृम्भते । मतेऽस्मिन्,

इन्द्रियार्थसन्निकर्षजं ज्ञानमेव (प्रत्यक्ष) प्रमाणपदवीमवगाहते । अक्षजमेवैकं प्रमाणमिति निश्चितम् । पृथ्वी - जलं - तेजो-वायुरिति भूतचतुष्टयस्य प्रमेयम् (विषयः) (दर्शनान्तरे) अनुमानगम्याकाशविषये प्रत्यक्षस्याभावात् आकाशाभावः । मानात् हि मेयसिद्धिः । अपि च, अग्नेरौष्ण्यं जलस्यशैत्यै वा स्वभावात् न तु अकस्मात् सिद्यति ।

ननु, व्याप्तिज्ञानाधीनमनुमानं प्रमाणं कथं भवेत् । व्याप्तिज्ञानं न प्रत्यक्षगग्यं खलु । कालत्रयेऽपि पदार्थानां संयोगसंभवात् भूतभविष्यतोरिन्द्रियाणामप्रवेशश्च। सामान्यगोचरं व्याप्तिज्ञानं भवेत् तर्हि तस्य इन्द्रियज्ञेयत्वेन अप्रयोजकत्वात् अनवश्यकत्वात् वा । तस्य व्यक्ति साहचर्यं च कुतोन स्यात् । बहिरिन्द्रियतन्त्रेण दुर्ज्ञेयोऽर्थ; अन्यकारणेनापि दुर्ज्ञेयः इति विवदन्ते बार्हस्पत्याः । किंच सर्वाः धूमाग्निव्यक्तयः प्रत्यक्षविषयाः भवितुं न शक्याः । ननु उपाधिज्ञाने जाते व्याप्तिज्ञानं, व्याप्तिज्ञानाधीनमित्यन्योन्याश्रयः । साध्य साधनाविनाभावस्य दुर्बोधतया नानुमानावकाशः । अत्र जयन्तभट्टः न्यायमंजर्याम् -

न प्रत्यक्षीकृता यावद्धूमग्नि व्यक्तयोऽखिलाः ।
तावत् स्यादपि धूमोऽसौ यो नाग्नेरिति शङ्कते ॥
ये तु प्रत्यक्षतो विश्वं पश्यन्ति हि भवादृशाः ।
किंदिव्यचक्षुषामेषामनुमान प्रयोजनम् ॥
सामान्यद्वारको ऽ प्यस्ति ना विनाभावनिश्चयः ।
वास्तवं हि न सामान्यं नाम किंचन विद्यते ॥ (आ . २.)

प्रसङ्गात्, वादिदेवकृतस्याद्वादरत्नाकरे अनुमानाप्रामाण्यविषये क्रोडीकृताः अंशाः स्मरणीया : - अस्पष्टत्वात् स्वार्थनिश्चये परापेक्षत्वात्, प्रत्यक्षपूर्वकत्वात्, अर्थादनुपजायमानत्वात्, अवस्तुविषयत्वाात्, बाध्यमानत्वात् साध्यसाधनयोः

प्रतिबन्धसाधक प्रमाणाभावाद् वा नानुमानं प्रमाणं, अपि तु ऊहामात्रमेव ।

एवमेव, औपाधिकसबन्धसंयुक्तत्वात् उपमानादिकमपि दूरापास्तम् ।

पञ्चेन्द्रियगोचरमेव वस्त्वस्ति नापरं किंचन । प्रत्यक्षाभावाद् एव परलोकस्या प्रमाण्यम्। पुण्यपापे न स्तः । तयोः फलं स्वर्गनरकादिरूपं न विद्यते। ईश्वरः नास्ति नापि मोक्षः ।

लोकायता वदन्त्येवं नास्ति देवो न निर्वृतिः ।
धर्माधर्मौ न विद्येते न फलं पुण्यपापयोः ॥

परलोकाभावे शारीरकक्लेश प्रापणीयस्य पारलौकिकस्य सुखस्याभावे-अग्निहोत्रादौ न कश्चिन्मतिमान् प्रवर्तते । अग्निहोत्रादयः बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः । यागे हन्यमानः पशुः स्वर्गं गच्छेत् यजमानेन स्व पिता कुतो न हन्यते । मृतानां तृप्तये यदि श्रद्धं तिलाञ्चलिर्वा अर्प्यते पथिकानां कृते किमुत न दीयते । दानेन तृप्तिमनुभवेयुः चेत् स्वर्गताः प्रासादस्थिताः कस्मान्न तृप्यन्ति । अतः न कर्म न स्वर्गः नाप्यपवर्ग; न वर्णाश्रमधर्माश्च। ये शास्त्रकाराः अनुमानागम प्रमाणद्वारा पुण्यपापचेष्टा-प्राप्यस्वर्गनरकादिसुखास्सु खं व्यवस्थापयन्ति हेयोपादेयादि संकटे पातयन्ति निमज्जयन्ति वा ते वाचाटा वैदिकम्मन्याः धार्मिकमानिनः एवेति अवमन्यन्ते चार्वाकमतानुसारिभिः ।

पृथिव्यादिभूतचतुष्टयसंयोगात् शरीरोपत्पत्तिः, शरीरे तावत् चेतनत्वं च प्रतिपादितं लोकायतिकैः । प्रत्यक्षादृते अनुमानाद्यस्वीकारे देहातिरिक्तात्मभावे प्रमाणा भावात् शरीरस्यैवात्मता किण्वादिभ्यः उन्मादकत्वं यथा। मरणात्परं नस्ति किंचिदतः देहनाशे मोक्षप्राप्तिरप्युपपादितम् ।

यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः। (ऋणंकृत्वाघृतं पिबेत्)
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥

– इति उद्घोषयन्ति । वरमद्यकपोतः श्वोमयूरात् इति लोकायतिकानां प्रत्ययः। देहाभिन्नात्मवादे उपपन्ने मम देहः इत्यादिप्रयोगः केवलं लाक्षणिकः । अर्थकामावेव

पुरुषार्थौ इति मन्यमानाः चार्वाकाः दुःखसंमिश्रितमपि सुखं त्यक्तुं नोचितम् । दुःखभयात् दृष्टसुखत्यागेन नरः पशुवन्मूर्खो भवेत् । भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते किल इति तर्कयन्ति । प्रत्यक्षानुभाव्यं ऐहिकं सांसारिकसुखमुपेक्ष्य तपश्चरणादिकष्टक्रिया साध्यपरलोक सुखादौ प्रवृतिः मोक्षो रतिर्वा निरर्था । सा मौढ्यस्य पराकाष्ठा इत्यभ्युपगम्यते बार्हस्पत्यैः ।

अत्र वेदान्तिनस्तु प्रत्याचक्षन्ते - न चैतन्यं पृथिव्यादीनां संधातः धर्मो वा[२]। अशरीरता हि चैतन्यमयस्यात्मनः स्वरूपम् । आत्मानाम सकलप्राणिनां स्वसंवेद्यः अशरीरः प्रत्यक्चेतनः। अयमात्मा ब्रह्म[३]। ब्रह्मैव जगतः कारणं भवति चेतनत्वेन[४]। आगमाद्विना प्रमाणान्तरेण चिद्रूप्यात्मतत्वं न ज्ञातु शक्यम् । न शास्त्रं पदार्थान् सृजति किंतु यथाभूतानज्ञातान् ज्ञापयति । अतीन्द्रियार्थविषये - आत्मतत्वज्ञाने धर्माधर्मस्वरूपविज्ञाने च नः श्रुतिरेव प्रमाणमिति[५] ।

अहो, नैरात्म्यवादिनां चार्वाकानां चिंतन चमत्कृतिराचारहीना निश्चेतना। परमपुरुषार्थं मोक्षं विना शास्त्रं भावयेत् किंतु धर्मेण विना (शरीरभिन्न) चैतन्येन विना पुरुषस्य जीवितम् पशुवद् भवेत्[५]।

तथापि अध्यात्मविद्याप्रधानेऽस्मिन् भारते चार्वाकचिंतन प्रवृत्तिर्प्रादुरभूत् प्रचारं प्रापत् च इतीयं चिंतनास्वातन्त्र्यस्य वाक्स्वातन्त्र्यस्य च द्योतिका ।

१. (i) युक्तिर्बलीयसी यत्र सर्वं स्वभाविकं मतम् ।
कस्यापि नेश्वरः कर्ता न वेदो नास्तिकं हितत् ॥ शुक्रनीति सारः ४.३.५५

(ii) योऽवमन्येत ते मूले हेतु शास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ मनु. स्मृति. २.॥

(iii) मिथ्यादृष्टिर्नास्तिकता । अमर कोष : १.५

२. (i) चैतन्याव्यतिरेकेणैव हि कला (प्राणाद्याः) जायमानस्तिष्ठन्त्यः

प्रलीयमानाश्च सर्वदा लक्ष्यते। अत एव भ्रान्ताः केचित् । अग्निसंयोगात् घृतमिव घटाद्याकारेण चैतन्यमेव प्रतिक्षणं जायतेनश्यतीति । तन्निरोधे शून्यमिव सर्वमित्यपरे । घटादिविषयं चैतन्यं चेतयितुर्नित्यस्यात्मनोऽनित्यं जायते विनश्यतीत्यपरे। चैतन्यं भूतधर्म इति लोकायतिकाः । प्रश्नो प. शां भा. ६.२.

(ii) चैतन्यं पृथिव्यादीनामन्यतमस्य सर्वेषां विपरिणतानां वा धर्मो न भवति तथा

श्रोत्रादीनामन्तःकरणस्य च धर्मो न भवति इति ब्रह्मणो रूपमितिः ब्रह्मरूप्यते चैतन्येन । केनोप शा. भा. २.१

३. आत्मा हि नाम सर्वजंतूनां प्रत्यक्चेतनः स्वसंवेधः प्रसिद्धस्तेनैव स्वरूपेणोक्षीय अशरीरो व्योमवत्सर्वगत आत्मा ब्रह्मेत्यवगन्तन्यम् । छा.उप. शां. भा. ८.१४.१.

४. यस्माच्च जायते किंचिदस्तीति दृष्टं लोके तथा घटांकुरादिकारणं मृद्बीजादि। तस्मादाकाशादि-कारणत्वादस्ति ब्रह्म । ... तद्यदि मृद्बीजादिवत्कारणं स्यादचेतनं तर्हि । न । कामयितृत्वात् । न हि कामयित्रचेतन मस्ति लोके । सर्वज्ञं हि ब्रह्मेत्यवोचाम । तै.उप.शा. भा २.६

५. (i) न च धर्माधर्मयोः स्वरुपफलसाधनादिसमधिगमे शास्त्रादतिरिक्तं कारणं शक्यं संभावयितुम् । ब्र.सू.शं.भा. ३.१.८.

(ii) न तथा एतदात्मतत्त्वं प्रमाणान्तरेण विषयीकर्तुं शक्यते । बृ. उप. शा. भा. ४.४.२०

(iii) आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत् । ब्र.सू.शा. २.१.६.